# shrIrAkiNIkeshavasahasranAmastotram

# શ્રીરાકિણીકેશવસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : rAkiNIkeshavasahasra (svAdhiShThAna chakrasya shaktiH)

File name : rAkiNIkeshavasahasra.itx

Category : sahasranAma, devii, ShaTchakrashakti, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Mark S.G. Dyczkowski muktAbodha

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmale uttaratantre bhairava bhairavI sa.nvAde

Latest update : August 22, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 22, 2020

*sanskritdocuments.org*

# શ્રીરાકિણીકેશવસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
આનન્દભૈરવી ઉવાચ ।
કથયામિ મહાકાલ પરમાદ્ભુતસાધનમ્ ।
કુણ્ડલીરૂપિણી દેવી રાકિણ્યાઃ કુલવલ્લભ ॥ ૧॥

માનસં દ્રવ્યમાનીય ચાથવા બાહ્યદ્રવ્યકમ્ ।
અનષ્ટહૃષ્ટચિત્તશ્ચ પૂજયેત્ સાવધાનતઃ ॥ ૨॥

ભક્ત્યા જપેન્મૂલમન્ત્રં માનસં સર્વમેવ ચ ।
પૂજયિત્વા તતો જપ્ત્વા હોમં કુર્યાત્ પરામૃતૈઃ ॥ ૩॥

સમાસૈઃ પક્વનૈવેદ્યૈઃ સુગન્ધિકુસુમૈસ્તથા ।
સ્વયમ્ભૂકુસુમૈર્નીત્યમર્ઘ્યં કૃત્વા નિવેદયેત્ ॥ ૪॥

સુમુખં પૂજયેન્નિત્યં મધુમાંસેન શઙ્કર ।
હુત્વા હુત્વા પુનર્હુત્વા પ્રાણવાય્વગ્નિસઙ્ગમૈઃ ॥ ૫॥

ભ્રામયિત્વા મનો બાહ્યે સ્થાપયિત્વા પુનઃ પુનઃ ।
પુનરાગમ્યગમનં કારયિત્વા સુમઙ્ગલમ્ ॥ ૬॥

વાચયિત્વા સુવાણીભિર્યાચયિત્વા સવાપિકમ્ ।
તર્પણં ચાભિષેકઞ્ચ કેવલાસવમિશ્રિતૈઃ ॥ ૭॥

માંસૈર્મુદ્રાદિભિર્મત્સ્યૈઃ સારદ્રવ્યૈઃ સપિષ્ટકૈઃ ।
ઘૃતાદિસુફલૈર્વાપિ યદ્ યદાયાતિ કૌલિકે ॥ ૮॥

અચલાં ભક્તિમાપ્નોતિ વિશ્વામિત્રો યથા વશી ।
તત્તદ્દ્રવ્યૈઃ સાધકેન્દ્રો નિત્યં સન્તર્પ્ય સઞ્જપેત્ ॥ ૯॥

એતન્મન્ત્રં પાઠિત્વા ચ તર્પણઞ્ચ સમાચરેત્ ।
તર્પણાન્તે ચાભિષેકં સદા કુર્યાચ્ચ તાન્ત્રિકઃ ॥ ૧૦॥

મૂલાન્તે ચાભિષિઞ્ચામિ નમઃ સ્વાહા પદં તતઃ ।
તતો હિ પ્રણમેદ્ભક્ત્યા અષ્ટાઙ્ગનતિભિઃ પ્રભો ॥ ૧૧॥

સહસ્રનામ્ના સ્તવનમષ્ટોત્તરસમન્વિતમ્ ।
અર્ધાઙ્ગ રાકિણીયુક્તં રાકિણીકેશવસ્તવમ્ ॥ ૧૨॥

શૃણુ તં સકલં નાથ યત્ર શ્રદ્ધા સદા તવ ।
શ્રવણાર્થં બહૂક્તં તત્ કૃપયા તે વદામ્યહ ॥ ૧૩॥

એતત્ શ્રવણમાત્રેણ સર્વપાપક્ષયો ભવેત્ ।
રાકિણીસઙ્ગમં નાથ સ્તવનં નામ પાવનમ્ ॥ ૧૪॥

યે પઠન્તિ શ્રદ્ધયા ચાશ્રદ્ધયા વા પુનઃ પુનઃ ।
તસ્ય સર્વઃ પાપરાશિઃ ક્ષયં યાતિ ક્ષણાદિહ ॥ ૧૫॥

કાલે કાલે મહાવીરો ભવત્યેવ હિ યોગિરાટ્ ।
સંસારોત્તારણે યુક્તો મહાબલપરાક્રમઃ ॥ ૧૬॥

ૐ શ્રીકૃષ્ણો મહામાયા યાદવો દેવરાકિણી ।
ગોવિન્દો વિશ્વજનની મહાવિષ્ણુર્મહેશ્વરી ॥ ૧૭॥

મુકુન્દો માલતી માલા વિમલા વિમલાકૃતિઃ ।
રમાનાથો મહાદેવી મહાયોગી પ્રભાવતી ॥ ૧૮॥

વૈકુણ્ઠો દેવજનની દહનો દહનપ્રિયા ।
દૈત્યારિર્દૈત્યમથિની મુનીશો મૌનભાવિતા ॥ ૧૯॥

નારાયણો જયકલા કરુણો કરુણામયી ।
હૃષીકેશઃ કૌશિકી ચ કેશવઃ કેશિઘાતિની ॥ ૨૦॥

કિશોરાપિ કૈશોરી મહાકાલી મહાકલા ।
મહાયજ્ઞો યજ્ઞહર્ત્રી દક્ષેશો દક્ષકન્યકા ॥ ૨૧॥

મહાબલી મહાબાલા બાલકો દેવબાલિકા ।
ચક્રધારી ચક્રકરા ચક્રાઙ્ગઃ ચક્રમદીકા ॥ ૨૨॥

અમરો યુવતી ભીમો ભયા દેવો દિવિસ્થિતા ।
શ્રીકરો વેશદા વૈદ્યો ગુણા યોગી કુલસ્થિતા ॥ ૨૩॥

સમયજ્ઞો માનસજ્ઞા ક્રિયાવિજ્ઞઃ ક્રિયાન્વિતા ।
અક્ષરો વનમાલા ચ કાલરૂપી કુલાક્ષરા ॥ ૨૪॥

વિશાલાક્ષો દીર્ઘનેત્રા જયદો જયવાહના ।
શાન્તઃ શાન્તિકરી શ્યામો વિમલશ્યામ વિગ્રહા ॥ ૨૫॥

કમલેશો મહાલક્ષ્મી સત્યઃ સાધ્વી શિશુઃ પ્રભા ।
વિદ્યુતાકારવદનો વિદ્યુત્પુઞ્જનભોદયા ॥ ૨૬॥

રાધેશ્વરો રાકિણી ચ કુલદેવઃ કુલામરા ।
દક્ષિણો દક્ષિણી શ્રીદા ક્રિયાદક્ષો મહાલયા ॥ ૨૭॥

વશિષ્ઠગમનો વિદ્યા વિદ્યેશો વાક્સરસ્વતી ।
અતીન્દ્રિયો યોગમાતા રણેશી રણપણ્ડિતા ॥ ૨૮॥

કૃતાન્તકો બાલકૃષ્ણા કમનીયઃ સુકામના ।
અનન્તો અનન્તગુણદા વાણીનાથો વિલક્ષણા ॥ ૨૯॥

ગોપાલો ગોપવનિતા ગોગોપ કુલાત્મજા ।
મૌની મૌનકરોલ્લાસા માનવો માનવાત્મજા ॥ ૩૦॥

સર્વાચ્છિન્નો મોહિની ચ માયી માયા શરીરજા ।
અક્ષુણ્ણો વજ્રદેહસ્થા ગરુડસ્થો હિ ગારુડી ॥ ૩૧॥

સત્યપ્રિયા રુક્મિણી ચ સત્યપ્રાણોઽમૃતાપહા ।
સત્યકર્મા સત્યભામા સત્યરૂપી ત્રિસત્યદા ॥ ૩૨॥

શશીશો વિધુવદના કૃષ્ણવર્ણો વિશાલધીઃ ।
ત્રિવિક્રમો વિક્રમસ્થા સ્થિતિમાર્ગઃ સ્થિતિપ્રિયા ॥ ૩૩॥

શ્રીમાધવો માધવી ચ મધુહા મધુસૂદની ।
વૈકુણ્ઠનાથો વિકલા વિવેકસ્થો વિવેકિની ॥ ૩૪॥

વિવાદસ્થો વિવાદેશી કુમ્ભકઃ કુમ્ભકારિકા ।
સુધાપાનઃ સુધારૂપા સુવેશો દેવમોહિની ॥ ૩૫॥

પ્રક્રિયાધારકો ધન્યા ધન્યાર્થો ધન્યવિગ્રહા ।
ધરણીશો મહાનન્તા સાનન્તો નન્દનપ્રિયા ॥ ૩૬॥

પ્રિયો વિપ્રિયહરા ચ વિપ્રપૂજ્યો દ્વિજપ્રિયા ।
કાન્તો વિધુમુખી વેદ્યો વિદ્યા વાગીશ્વરોઽરુણા ॥ ૩૭॥

અકામી કામરહિતા કમ્રો વિલચરપ્રિયા ।

પુણ્ડરીકો વિકુણ્ડસ્થા વૈકુણ્ઠો બાલભાવિની ॥ ૩૮॥

પદ્મનેત્ર પદ્મમાલા પદ્મહસ્તોઽમ્બુજાનના ।
પદ્મનાભિઃ પદ્મનેત્રા પદ્મસ્થઃ પદ્મવાહના ॥ ૩૯॥

વાસુદેવો બૃહદ્ગર્ભા મહામાની મહાઙ્ગના ।
કારુણ્યો બાલગર્ભા ચ આકાશસ્થો વિભાણ્ડજા ॥ ૪૦॥

તેજોરાશિસ્તૈજસી ચ ભયાચ્છન્નો ભયપ્રદા ।
ઉપેન્દ્રો વર્ણજાલસ્થા સ્વતન્ત્રસ્થો વિમાનગા ॥ ૪૧॥

નગેન્દ્રસ્થો નાગિની ચ નગેશો નાગનન્દિની ।
સાર્વભૌમો મહાકાલી નગેન્દ્રઃ નન્દિનીસુતા ॥ ૪૨॥

કામદેવાશ્રયો માયા મિત્રસ્થો મિત્રવાસના ।
માનભઙ્ગકરો રાવા વારણારિપ્રિયઃ પ્રિયા ॥ ૪૩॥

રિપુહા રાકિણી માતા સુમિત્રો મિત્રરક્ષિકા ।
કાલાન્ત કલહા દેવી પીતવાસામ્બરપ્રિયા ॥ ૪૪॥

પાપહર્તા પાપહન્ત્રી નિષ્પાપઃ પાપનાશિની ।
પરાનન્દપ્રિયો મીના મીનરૂપી મલાપહા ॥ ૪૫॥

ઇન્દ્રનીલમણિશ્યામો મહેન્દ્રો નીલરૂપિણી ।
નીલકણ્ઠપ્રિયો દુર્ગા દુર્ગાદુર્ગતિનાશિની ॥ ૪૬॥

ત્રિકોણમન્દિરશ્રીદો વિમાયા મન્દિરસ્થિતા ।
મકરન્દરસોલ્લાસો મકરન્દરસપ્રિયા ॥ ૪૭॥

દારુણારિનિહન્તા ચ દારુણારિવિનાશિની ।
કલિકાલકુલાચારઃ કલિકાલફલાવહા ॥ ૪૮॥

કાલક્ષેત્રસ્થિતો રૌદ્રી વ્રતસ્થો વ્રતધારિણી ।
વિશાલાક્ષો વિશાલાસ્યા ચમત્કારો કરોધમા ॥ ૪૯॥

લકારસ્થો લાકિની ચ લાઙ્ગલી લોલયાન્વિતા ।
નાકસ્થો નાકપદકા નાકાક્ષો નાકરક્ષકા ॥ ૫૦॥

કામગો નામસમ્બન્ધા સામવેદવિશોધિકા ।
સામવેદઃ સામસન્ધ્યા સામગો માંસભક્ષિણી ॥ ૫૧॥

સર્વભક્ષો રાત્રભક્ષા રેતસ્થો રેતપાલિની ।
રાત્રિકારી મહારાત્રિઃ કાલરાત્રો મહાનિશા ॥ ૫૨॥

નાનાદોષહરો માત્રા મારહન્તા સુરાપહા ।
ચન્દનાઙ્ગી નન્દપુત્રી નન્દપાલઃ વિલોપિની ॥ ૫૩॥

મુદ્રાકારી મહામુદ્રા મુદ્રિતો મુદ્રિતા રતિઃ ।
શાક્તો લાક્ષા વેદલાક્ષી લોપામુદ્રા નરોત્તમા ॥ ૫૪॥

મહાજ્ઞાનધરોઽજ્ઞાની નીરા માનહરોઽમરા ।
સત્કીર્તીસ્થો મહાકીર્તીઃ કુલાખ્યો કુલકીર્તીતા ॥ ૫૫॥

આશાવાસી વાસના સા કુલવેત્તા સુગોપિતા ।
અશ્વત્થવૃક્ષનિલયો વૃક્ષસારનિવાસિની ॥ ૫૬॥

નિત્યવૃક્ષો નિત્યલતા ક્લૃપ્તઃ ક્લૃપ્તપદસ્થિતઃ ।
કલ્પવૃક્ષો કલ્પલતા સુકાલઃ કાલભક્ષિકા ॥ ૫૭॥

સર્વાલઙ્કારભૂષાઢ્યો સર્વાલઙ્કારભૂષિતા ।
અકલઙ્કી નિરાહારા દુર્નીરીક્ષ્યો નિરાપદા ॥ ૫૮॥

કામકર્તા કામકાન્તા કામરૂપી મહાજવા ।
જયન્તો યાજયન્તી ચ જયાખ્ય જયદાયિની ॥ ૫૯॥

ત્રિજીવનો જીવમાતા કુશલાખ્યો વિસુન્દરા ।
કેશધારી કેશિની ચ કામજો કામજાઽયદા ॥ ૬૦॥

કિઙ્કુરસ્થો વિકારસ્થા માનસંજ્ઞો મનીષિણી ।
મિથ્યાહરો મહામિથ્યા મિથ્યાસર્ગો નિરાકૃતિ ॥ ૬૧॥

નાગયજ્ઞોપવીતશ્ચ નાગમાલાવિભૂષિતા ।
નાગાખ્યો નાગકુલપા નાયકો નાયિકા વધૂઃ ॥ ૬૨॥

નાયકક્ષેમદો નારી નરો નારાયણપ્રિયા ।
કિરાતવર્ણો રાસજ્ઞી તારકો ગુણતારિકા ॥ ૬૩॥

શઙ્કુરાખ્યોઽમ્બુજાકારા કૃપણઃ કૃપણાવતી ।
દેશગો દેશસન્તોષા દર્શો દર્શનિવાસિની ॥ ૬૪॥

દર્શનજ્ઞો દર્શનસ્થા દૃગ્ દૃદિક્ષા સુરોઽસુરાઃ ।
સુરપાલો દેવરક્ષા ત્રિરક્ષો રક્ષદેવતા ॥ ૬૫॥

શ્રીરામસેવી સુખદા સુખદો વ્યાસવાસિની ।
વૃન્દાવનસ્થો વૃન્દા ચ વૃન્દાવન્યો મહત્તનૂ ॥ ૬૬॥

બ્રહ્મરૂપી ત્રિતારી ચ તારકાક્ષો હિ તારિણી ।
તન્ત્રાર્થજ્ઞઃ તન્ત્રવિદ્યા સુતન્ત્રજ્ઞઃ સુતન્ત્રિકા ॥ ૬૭॥

તૃપ્તઃ સુતૃપ્તા લોકાનાં તર્પણસ્થો વિલાસિની ।
મયૂરા મન્દિરરતો મથુરા મન્દિરેઽમલા ॥ ૬૮॥

મન્દિરો મન્દિરાદેવી નિર્માયી માયસંહરા ।
શ્રીવત્સહૃદયો વત્સા વત્સલો ભક્તવત્સલા ॥ ૬૯॥

ભક્તપ્રિયો ભક્તગમ્યા ભક્તો ભક્તિઃ પ્રભુઃ પ્રભા ।
જરો જરા વરો રાવા હવિર્હેમા ક્ષમઃ ક્ષિતિ ॥ ૭૦॥

ક્ષોણીપો વિજયોલ્લાસા વિજયોજયરૂપિણી ।
જયદાતા દાતૃજાયા બલિપો બલિપાલિકા ॥ ૭૧॥

કૃષ્ણમાર્જારરૂપી ચ કૃષ્ણમાર્જારરૂપિણી ।
ઘોટકસ્થો હયસ્થા ચ ગજગો ગજવાહના ॥ ૭૨॥

ગજેશ્વરો ગજાધારા ગજો ગર્જનતત્પરા ।
ગયાસુરો ગયાદેવી ગજદર્પો ગજાપીતા ॥ ૭૩॥

કામનાફલસિદ્ધ્યર્થી કામનાફલસિદ્ધિદા ।
ધર્મદાતા ધર્મવિદ્યા મોક્ષદો મોક્ષદાયિની ॥ ૭૪॥

મોક્ષાશ્રયો મોક્ષકર્ત્રી નન્દગોપાલ ઈશ્વરી ।
શ્રીપતિઃ શ્રીમહાકાલી કિરણો વાયુરૂપિણી ॥ ૭૫॥

વાય્વાહારી વાયુનિષ્ઠા વાયુબીજયશસ્વિની ।
જેતા જયન્તી યાગસ્થો યાગવિદ્યા શિવઃ શિવા ॥ ૭૬॥

વાસવો વાસવસ્થી ચ વાસાખ્યો ધનવિગ્રહા ।
આખણ્ડલો વિખણ્ડા ચ ખણ્ડસ્થો ખણ્ડખઞ્જની ॥ ૭૭॥

ખડ્ગહસ્તો બાણહસ્તા બાણગો બાણવાહના ।
સિદ્ધાન્તજ્ઞો ધ્વાન્તહન્ત્રી ધનસ્થો ધાન્યવર્દ્ધીની ॥ ૭૮॥

લોકાનુરાગો રાગસ્થા સ્થિતઃ સ્થાપકભાવના ।

સ્થાનભ્રષ્ટોઽપદસ્થા ચ શરચ્ચન્દ્રનિભાનના ॥ ૭૯॥

ચન્દ્રોદયશ્ચન્દ્રવર્ણા ચારુચન્દ્રો રુચિસ્થિતા ।
રુચિકારી રુચિપ્રીતા રચનો રચનાસના ॥ ૮૦॥

રાજરાજો રાજકન્યા ભુવનો ભુવનાશ્રયા ।
સર્વજ્ઞઃ સર્વતોભદ્રા વાચાલો લયધાતિની ॥ ૮૧॥

લિઙ્ગરૂપધરો લિઙ્ગા કલિઙ્ગઃ કાલકેશરી ।
કેવલાનન્દરૂપાખ્યો નિર્વાણમોક્ષદાયિની ॥ ૮૨॥

મહામેઘગાઢ મહાનન્દરૂપા મહામેઘજાલો મહાઘોરરૂપા ।
મહામેઘમાલઃ સદાકારપાલા મહામેઘમાલામલાલોલકાલી ॥ ૮૩॥

વિયદ્વ્યાપકો વ્યાપિકા સર્વદેહે મહાશૂરવીરો મહાધર્મવીરા ।
મહાકાલરૂપી મહાચણ્ડરૂપા વિવેકી મદૈકી કુલેશઃ કુલેશી ॥ ૮૪॥

સુમાર્ગી સુગીતા શુચિસ્વો વિનિતા મહાર્કો વિતર્કા સુતર્કોઽવિતર્કા ।
કૃતીન્દ્રો મહેન્દ્રી ભગો ભાગ્યચન્દ્રા ચતુર્થો મહાર્થા નગઃ કીર્તીચન્દ્રા ॥ ૮૫॥

વિશિષ્ટો મહેષ્ટિર્મનસ્વી સુતુષ્ટિર્મહાષડ્દલસ્થો મહાસુપ્રકાશા ।
ગલચ્ચન્દ્રધારામૃતસ્નિગ્ધદેહો ગલત્કોટિસૂર્યપ્રકાશાભિલાષા ॥ ૮૬॥

મહાચણ્ડવેગો મહાકુણ્ડવેગી મહારુણ્ડખણ્ડો મહામુણ્ડખણ્ડા ।
કુલાલભ્રમચ્ચક્રસારઃ પ્રકારા કુલાલો મલાકા રચક્રપ્રસારી ॥ ૮૭॥

કુલાલક્રિયાવાન્ મહાઘોરખણ્ડઃ કુલાલક્રમેણ ભ્રમજ્ઞાનખણ્ડા ।
પ્રતિષ્ઠઃ પ્રતિષ્ઠા પ્રતીક્ષઃ પ્રતીક્ષા મહાખ્યો મહાખ્યા સુકાલોઽતિદીક્ષા ॥ ૮૮॥

મહાપઞ્ચમાચારતુષ્ટઃ પ્રચેષ્ટા મહાપઞ્ચમા પ્રેમહા કાન્તચેષ્ટા ।
મહામત્તવેશો મહામઙ્ગલેશી સુરેશઃ ક્ષપેશી વરો દીર્ઘવેશા ॥ ૮૯॥

ચરો બાહ્યનિષ્ઠા ચરશ્ચારુવર્ણા કુલાદ્યોઽકુલાદ્યા યતિર્યાગવાદ્યા ।
કુલોકાપહન્તા મહામાનહન્ત્રી મહાવિષ્ણુયોગી મહાવિષ્ણુયોગા ॥ ૯૦॥

ક્ષિતિક્ષોભહન્તા ક્ષિતિક્ષુબ્ધબાધા મહાર્ઘો મહાર્ઘા ધની રાજ્યકાર્યા ।
મહારાત્રિ સાન્દ્રાન્ધકારપ્રકાશો મહારાત્રિ સાન્દ્રાન્ધકારપ્રવેશા ॥ ૯૧॥

મહાભીમગમ્ભીરશબ્દપ્રશબ્દો મહાભીમગમ્ભીરશબ્દાપશબ્દા ।
કુલા જ્ઞાનદાત્રી યમો યામયાત્રા વશી સૂક્ષ્મવેશાશ્ચગો નામમાત્રા ॥ ૯૨॥

હિરણ્યાક્ષહન્તા મહાશત્રુહન્ત્રી વિનાશપ્રિયો બાણનાશપ્રિયા ચ ।
મહાડાકિનીશો મહારાકિણીશો મહાડાકિની સા મહારાકિણી સા ॥ ૯૩ ॥

મુકુન્દો મહેન્દ્રો મહાભદ્રચન્દ્રા ક્ષિતિત્યાગકર્તા મહાયોગકર્ત્રી ।
હિતો મારહન્ત્રી મહેશેશ ઇન્દ્રા ગતિક્ષોભભાવો મહાભાવપુઞ્જા ॥ ૯૪ ॥

શશીનાં સમૂહો વિધોઃ કોટિશક્તિઃ કદમ્બાશ્રિતો વારમુખ્યા સતીના ।
મહોલ્લાસદાતા મહાકાલમાતા સ્વયં સર્વપુત્રઃ સ્વયં લોકપુત્રી ॥ ૯૫ ॥

મહાપાપહન્તા મહાભાવભર્ત્રી હરિઃ કાર્તીકી કાર્તીકો દેવસેના ।
જયાત્મો વિલિમા કુલાત્મો ગણાત્મા સુવીર્યો સભાષા ક્ષિતીશોઽભિયાતા ॥ ૯૬ ॥

ભવાન્ ભાવલક્ષ્મીઃ પ્રિયઃ પ્રેમસૂક્ષ્મા જનેશો ધનેશી કૃપો માનભઙ્ગા ।
કઠોરોત્કટાનાં મહાબુદ્ધિદાતા કૃતિસ્થા ગુણજ્ઞો ગુણાનન્દવિજ્ઞા ॥ ૯૭ ॥

મહાકાલપૂજ્યો મહાકાલપૂજ્યા ખગાખ્યો નગાખ્યા ખરઃ ખડ્ગહસ્તા ।
અથર્વોઽથર્વાન્દોલિતસ્થઃ મહાર્થા ખગક્ષોભનાશા હવિઃ કૂટહાલા ॥ ૯૮ ॥

મહાપદ્મ માલાધૃતો ગાણપત્યા ગણસ્થો ગભીરા ગુરુઃ જ્ઞાનગમ્યા ।
ઘટપ્રાણદાતા ઘનાકારરૂપા ભયાર્થોઽબીજાઽવારીઽકર્તા ॥ ૯૯ ॥

ભવો ભાવમાતા નરો યામધ્યાતા ચલાન્તોઽચલાખ્યા ચયોઽઞ્જાલિકા ચ ।
છલજ્ઞશ્છલાઢ્યા છકારશ્છકારા જયો જીવનસ્થા જલેશો જલેશા ॥ ૧૦૦ ॥

જપઞ્જાપકારી જગજ્જીવનીશા જગત્પ્રાણનાથો જગદાહ્લાદકારી ।
ઝરો ઝર્ઝરીશા ઝનત્કારશબ્દો ઝનઞ્ઝઞ્જનાનાદઝઙ્કારરાવા ॥ ૧૦૧ ॥

ઞચૈતન્યકારી ઞકૈવલ્યનારી હનોલ્લાસધારી ટનત્ટઙ્કહસ્તા ।
ઠરેશો પવિષ્ટશ્ઠકારાદિકોટી ડરો ડાકિનીશો ડરેશો ડમારા ॥ ૧૦૨ ॥

ઢમેશો હિ ઢક્કા વરસ્થાનબીજો ણવર્ણા તમાલતનુઃ સ્થાનનિષ્ઠા ।
થકારાર્ણમાનસ્થનિસ્થોઽસંખ્યા દયાવાન્ દયાર્દ્રા ધનેશો ધનાઢ્યા ॥ ૧૦૩ ॥

નવીનો નગેભાગતીર્ણાઙ્ગહારો નગેશી પરઃ પારણી સાદિપાલા ।
ફલાત્મા ફલા ફાલ્ગુની ફેણનાશઃ ફલાભૂષણાઢ્યા વશી વાસરમ્યા ॥ ૧૦૪ ॥

ભગાત્મા ભવસ્ત્રી મહાબીજમાનો મહાબીજમાલા મુકુન્દઃ સુસૂક્ષ્મા ।
યતિસ્થા યશસ્થા રતાનન્દકર્તા રતિર્લાકિનીશો લયાર્થ પ્રચણ્ડા ॥ ૧૦૫ ॥

પ્રવાલાઙ્ગધારી પ્રવાલાઙ્ગમાલા હલોહાલહેલાપદઃ પાદતાલા ।
વશીન્દ્રઃ પ્રકાશો વરસ્થાનવાસા શિવઃ શ્રીધરાઙ્ગઃ શલાકા શિલા ચ ॥ ૧૦૬ ॥

ષડાધારવાસી ષડાધારવિદ્યા ષડામ્ભોજસંસ્થઃ ષડબ્જોપવિષ્ટા ।
સદા સાધરોગ્રોપવિષ્ટાઽપરાગી સુસૂક્તાપયસ્થા પલાશ્રયસ્થિતા ॥ ૧૦૭॥

હરસ્થોગ્રકર્મા હરાનન્દધારા લઘુસ્થો લિપિસ્થા ક્ષયીક્ષુબ્ધક સંખ્યા ।
અનન્તો નિર્વાણાહરાકારબીજા ઉરસ્થોઽપ્યુરુસ્થા ઉરા ઊર્ધ્વરૂપા ॥ ૧૦૮॥

ઋચસ્થો હિ ઋગાલસો દીર્ઘલૃસ્થા ત્વમેકો હિ ચૈમ્બીજગુર્વી ગુણસ્થા ।
સદૌઙ્કારવર્ણા હ્સૌંકારબીજા અસઙ્કારચન્દ્રો હ્યુસઃ કારવીરા ॥ ૧૦૯॥

હરીન્દ્રો હરીશા હરિઃ કૃષ્ણરૂપા શિવો વેદભાષા ચ શૌરિઃ પ્રસઙ્ગા ।
ગણાધ્યક્ષરૂપી પરાનન્દભક્ષા પરેશો ગણેશી રસો વાસપૂજ્યા ॥ ૧૧૦॥

ચકોરિ કુલપ્રાણબુદ્ધિસ્થિતિસ્થા સ્વયં કામધેનુસ્વરૂપી વિરૂપા ।
શ્રીહિરણ્યપ્રભઃ શ્રી હિરણ્યપ્રભાઙ્ગી પ્રભાતાર્કવર્ણોઽરુણાકારણાઙ્ગી ॥ ૧૧૧॥

વિભા કોટિધારા ધરાધાર કોષા રણીશો પ્રત્યાદિકૂટોઽધરો  ધારણા શૌરિરાર્યા ।
મહાયજ્ઞસંસ્થો મહાયજ્ઞનિષ્ઠા સદાકર્મસઙ્ગઃ સદામઙ્ગરઙ્ગા ॥ ૧૧૨॥

કિરાતીપતિ રાકિણી કાલપુત્રી શિલાકોટ નિર્માણદોહા વિશાલા ।
કલાર્કકલસ્થો કલાકિઙ્કિણીસ્થા કિશોરઃ કિશોરી કુરુક્ષેત્રકન્યા ॥ ૧૧૩॥

મહાલાઙ્ગલિશ્રી બલોદ્દામકૃષ્ણઃ કુલાલાદિવિદ્યાઽભયો ભાવશૂન્યા ।
મહાલાકિની કાકિની શાકિનીશો મહાસુપ્રકાશા પરો હાકિનીશા ॥ ૧૧૪॥

કુરુક્ષેત્રવાસી કુરુપ્રેમમૂર્તીર્મહાભૂતિભોગી મહાયોગિની ચ ।
કુલાઙ્ગારકારો કુલાઙ્ગીશકન્યા તૃતીયસ્તૃતીયાઽદ્વિતીયોઽદ્વિતીયા ॥ ૧૧૫॥

મહાકન્દવાસી મહાનન્દકાશી પુરગ્રામવાસી મહાપીઠદેશા ।
જગન્નાથ વક્ષઃ સ્થલસ્થો વરેણ્યા અચ્યુતાનન્દકર્તા રસાનન્દકર્ત્રી ॥ ૧૧૬॥

જગદ્દીપકલો જગદ્દીપકાલી મહાકામરૂપી મહાકામપીઠા ।
મહાકામપીઠસ્થિરો ભૂતશુદ્ધિર્મહાભૂતશુદ્ધિઃ મહાભૂતસિદ્ધિઃ ॥ ૧૧૭॥

પ્રભાન્તઃ પ્રવીણા ગુરુસ્થો ગિરિસ્થા ગલદ્ધારધારી મહાભક્તવેષા ।
ક્ષણક્ષુન્નિવૃત્તિનીવૃત્તાન્તરાત્મા સદન્તર્ગતસ્થા લયસ્થાનગામી ॥ ૧૧૮॥

લયાનન્દકામ્યા વિસર્ગાપ્તવર્ગો વિશાલાક્ષમાર્ગા કુલાર્ણઃ કુલાર્ણા ।
મનસ્થા મનઃશ્રીઃ ભયાનન્દદાતા સદા લાણગીતા ગજજ્ઞાનદાતા મહામેરુપાયા ॥ ૧૧૯॥

તરોર્મૂલવાસી તરજ્ઞોપદર્શા સુરેશઃ સમેશઃ સુરેશા સુખી ખડ્ગનિષ્ઠા ।

ભયત્રાણકર્તા ભયજ્ઞાનહન્ત્રી જનાનાં મખસ્થો મખાનન્દભઙ્ગા ॥ ૧૨૦॥

મહાસત્પથસ્થો મહાસત્પથજ્ઞા મહાબિન્દુમાનો મહાબિન્દુમાના ।
ખગેન્દ્રોપવિષ્ટો વિસર્ગાન્તરસ્થા વિસર્ગપ્રવિષ્ટો મહાબિન્દુનાદા ॥ ૧૨૧॥

સુધાનન્દભક્તો વિધાનન્દમુક્તિઃ શિવાનન્દસુસ્થો વિનાનન્દધાત્રી ।
મહાવાહનાહ્લાદકારી સુવાહા સુરાનન્દકારા ગિરાનન્દકારી ॥ ૧૨૨॥

હયાનન્દકાન્તિઃ મતઙ્ગસ્થદેવો મતઙ્ગાધિદેવી મહામત્તરૂપઃ ।
તદેકો મહાચક્રપાણિઃ પ્રચણ્ડા ખિલાપસ્થલસ્થોઽવિહમ્રીશપત્ની ॥ ૧૨૩॥

શિખાનન્દકર્તા શિખાસારવાસી સુશાકમ્ભરી ક્રોષ્ટરી વેદવેદીસુગન્ધા ।
યુગો યોગકન્યા દવો દીર્ઘકન્યા શરણ્યઃ શરણ્યા મુનિજ્ઞાનગમ્યા સુધન્યઃ સુધન્યા ॥ ૧૨૪॥

શશી વેદજન્યા યમી યામવામા હ્યકામો હ્યકામા સદા ગ્રામકામા ।
ધૃતીશઃ ધૃતીશા સદા હાટકસ્થાઽ યનેશોઽયનેશી ભકારો ભગીરા ॥ ૧૨૫॥

ચલત્ખઞ્જનસ્થઃ ખલત્ખેલનસ્થા વિવાતી કિરાતી ખિલાઙ્ગોઽખિલાઙ્ગી ।
બૃહત્ખેચરસ્થો બૃહત્ખેચરી ચ મહાનાગરાજો મહાનાગમાલા ॥ ૧૨૬॥

હકારાર્દ્ધસંજ્ઞા વૃતોહારમાલા મહાકાલનેમિપ્રહા પાર્વતી ચ ।
તમિસ્રા તમિસ્રાવૃતો દુઃખહત્યા વિપન્નો વિપન્ના ગુણાનન્દકન્યા ॥ ૧૨૭॥

સદા દુઃખહન્તા મહાદુઃખહન્ત્રી પ્રભાતાર્ક વર્ણઃ પ્રભાતારુણશ્રીઃ ।
મહાપર્વતપ્રેમભાવોપપન્નો મહાદેવપત્નીશભાવોપપન્ના ॥ ૧૨૮॥

મહામોક્ષનીલપ્રિયા ભક્તિદાતા નયાનન્દ ભક્તિપ્રદા દેવમાતા ॥ ૧૨૯॥

ઇત્યેતત્કથિતં નાથ મહાસ્તોત્રં મનોરમમ્ ।
સહસ્રનામયોગાઽઙ્ગમષ્ટોત્તરસમન્વિતમમ્ ॥ ૧૩૦॥

યઃ પઠેત્ પ્રાતરુત્થાય શુચિર્વાશુચિમાનસઃ ।
ભક્ત્યા શાન્તિમવાપ્નોતિ અનાયાસેન યોગિરાટ્ ॥ ૧૩૧॥

પ્રત્યહં ધ્યાનમાકૃત્ય ત્રિસન્ધ્યં યઃ પઠેત્ શુચિઃ ।
ષણ્માસાત્ પરમો યોગી સત્યં સત્યં સુરેશ્વર ॥ ૧૩૨॥

અકાલમૃત્યુહરણં સર્વવ્યાધિવિનાશનમ્ ।
અપમૃત્ય્વાદિહરણં વારમેકં પઠેદ્યદિ ॥ ૧૩૩॥

પઠિત્ત્વા યે ન ગચ્છન્તિ વિપત્કાલે મહાનિશિ ।

અનાયાસેન તે યાન્તિ મહાઘોરે ભયાર્ણવે ॥ ૧૩૪॥

અકાલે યઃ પઠેન્નિત્યં સુકાલસ્તત્ક્ષણાદ્ભવેત્ ।
રાજસ્વહરણે ચૈવ સુવૃત્તિહરણાદિકે ॥ ૧૩૫॥

માસૈકપઠનાદેવ રાજસ્વં સ લભેદ્ ધ્રુવમ્ ।
વિચરન્તિ મહાવીરાઃ સ્વર્ગે મર્ત્યે રસાતલે ॥ ૧૩૬॥

ગણેશતુલ્યવલિનો મહાક્રોધશરીરિણઃ ।
એતત્સ્તોત્રપ્રસાદેન જીવન્મુક્તો મહીતલે ॥ ૧૩૭॥

મહાનામસ્તોત્રસારં ધર્માધર્મનિરૂપણમ્ ।
અકસ્માત્ સિદ્ધિદં કામ્યં કામ્યં પરમસિદ્ધિદમ્ ॥ ૧૩૮॥

મહાકુલકુણ્ડલિન્યાઃ ભવાન્યાઃ સાધને શુભે ।
અભેદ્યભેદને ચૈવ મહાપાતકનાશને ॥ ૧૩૯॥

મહાઘોરતરે કાલે પઠિત્વા સિદ્ધિમાપ્નુયાત્ ।
ષટ્ચક્રસ્તમ્ભનં નાથ પ્રત્યહં યઃ કરોતિ હિ ॥ ૧૪૦॥

મનોગતિસ્તસ્ય હસ્તે સ શિવો ન તુ માનુષઃ ।
યોગાભ્યાસં યઃ કરોતિ ન સ્તવઃ પઠ્યતે યદિ ॥ ૧૪૧॥

યોગભ્રષ્ટો ભવેત્ ક્ષિપ્રં કુલાચારવિલઙ્ઘનાત્ ।
કુલીનાય પ્રદાતવ્યં ન ખલ્વકુલેશ્વરમ્ ॥ ૧૪૨॥

કુલાચારં સમાકૃત્ય બ્રાહ્મણાઃ ક્ષત્રિયાદયઃ ।
યોગિનઃ પ્રભવન્ત્યેવ સ્તોત્રપાઠાત્ સદામરાઃ ॥ ૧૪૩॥

આનન્દભૈરવ ઉવાચ
વદ કાન્તે રહસ્યં મે મયા સર્વજ્ઞ વિસ્મૃતમ્ ।
મહાવિષં કાલકૂટં પીત્વા દેવાદિરક્ષણાત્ ॥ ૧૪૪॥

કણ્ઠસ્થાઃ દેવતાઃ સર્વા ભસ્મીભૂતાઃ સુસમ્ભૃતાઃ ।
મહાવિષજ્વાલયા ચ મમ દેહસ્થદેવતાઃ ॥ ૧૪૫॥

કૈવલ્યનિરતાઃ સર્વે પ્રાર્થયન્તિ નિરન્તરમ્ ।
ષટ્ચક્રં કથયિત્વા તુ સન્તોષં મે કુરુ પ્રભો ।
ષટ્ચક્રભેદકથનમમૃતશ્રવણાદિકમ્ ॥ ૧૪૬॥

કથિત્વા મમ સન્તોષં કુરુ કલ્યાણિ વલ્લભે ।

અમૃતાનન્દજલધૌ સુધાભિઃ સિક્તવિગ્રહમ્ ॥ ૧૪૭॥

કૃત્વા કથય શીઘ્રં મે ચાયુષં પરિવર્ધય ।
આનન્દભૈરવી ઉવાચ
નિગૂઢાર્થ મહાકાલ કાલેશ જગદીશ્વર ॥ ૧૪૮॥

ભૈરવાનન્દનિલય કાલકૂટનિષેવણ ।
ઇદાનીં શ‍ૃણુ યોગાર્થં મયિ સંયોગ એવ ચ ॥ ૧૪૯॥

શ્રુત્વા ચૈતત્ક્રિયાકાર્યં નરો યોગીશ્વરો ભવેત્ ।
મમોદ્ભવઃ ખેડમલે ચ સર્વાકારવિવર્જીતે ॥ ૧૫૦॥

ભ્રૂમધ્યે સર્વદેહે ચ સ્થાપયિત્વા ચ માં નરઃ ।
ભાવ્યતે ચાપરિચ્છન્નં બ્રહ્મવિષ્ણુશિવાત્મકમ્ ॥ ૧૫૧॥

મમ રૂપં મહાકાલ સત્ત્વરજસ્તમઃ પ્રિયમ્ ।
કેવલં રજોયોગેન શરીરં નાપિ તિષ્ઠતિ ॥ ૧૫૨॥

તથા કેવલયોગેન તમસા નાપિ તિષ્ઠતિ ।
તથા કેવલસત્ત્વેન કુતો દેહી પ્રતિષ્ઠતિ ।
અતસ્ત્રિગુણયોગેન ધારયામિ નવાઙ્ગકમ્ ॥ ૧૫૩॥

શનૈઃ શનૈઃ વિજેતવ્યાઃ સત્ત્વરજસ્તમોગુણાઃ ।
આદૌ જિત્વા રજોધર્મં પશ્ચાત્તામસમેવ ચ ॥ ૧૫૪॥

સર્વશેષે સત્ત્વગુણં નરો યોગીશ્વરો ભવેત્ ।
ગુણવાન્ જ્ઞાનવાન્ વાગ્મી સુશ્રીર્ધર્મી જિતેન્દ્રિયઃ ॥ ૧૫૫॥

શુદ્ધનિર્મલસત્વં તુ ગુણમાશ્રિત્ય મોક્ષભાક્ ।
સદા સત્ત્વગુણાચ્છન્નં પુરુષં કાલ એવ ચ ॥ ૧૫૬॥

પશ્યતીહ ન કદાચિજ્જરામૃત્યુવિવર્જીતમ્ ।
તં જનં પરમં શાન્તં નિર્મલં દ્વૈતવર્જીતમ્ ॥ ૧૫૭॥

સર્વત્યાગિનમાત્માનં કાલઃ સર્વત્ર રક્ષતિ ।
જલે વા પર્વતે વાપિ મહારણ્યે રણસ્થલે ॥ ૧૫૮॥

ભૂગર્ત્તનિલયે ભીતે સંહારે દુષ્ટવિગ્રહે ।
સન્તિષ્ઠતિ મહાયોગી સત્યં સત્યં કુલેશ્વર ॥ ૧૫૯॥

મહાયોગં શ‍ૃણુ પ્રાણવલ્લભ શ્રીનિકેતન ।

યોગાર્થં પરમં બ્રહ્મયોગાર્થ પરન્તપઃ ॥ ૧૬૦ ॥

યે જાનન્તિ મહાયોગં મ્રિયન્તે ન ચ તે નરાઃ ।
કૃત્વા કૃત્વા ષડ્દલસ્ય સાધનં કૃત્સ્નસાધનમ્ ॥ ૧૬૧ ॥

તતઃ કુર્યાન્મૂલપદ્મે કુણ્ડલીપરિચાલનમ્ ।
મુહુર્મુહુશ્ચાલનેન નરો યોગીશ્વરો ભવેત્ ॥ ૧૬૨ ॥

એકાન્તનિર્મલે દેશે દુર્ભીક્ષાદિવિવર્જીતે ।
વર્ષમેકાસને યોગી યોગમાર્ગપરો ભવેત્ ॥ ૧૬૩ ॥

પદ્માસનં સદા કુર્યાદ્ બદ્ધપદ્માસનં તથા ।
મહાપદ્માસનં કૃત્વા તથા ચાસનમઞ્જનમ્ ॥ ૧૬૪ ॥

તત્પશ્ચાત્ સ્વસ્તિકાખ્યઞ્ચ બદ્ધસ્વસ્તિકમેવ ચ ।
યોગાભ્યાસે સદા કુર્યાત્ મન્ત્રસિદ્ધ્યાદિકર્મણિ ॥ ૧૬૫ ॥

ચક્રાસનં સદા યોગી યોગસાધનકર્મણિ ।
બદ્ધચક્રાસનં નામ મહાચક્રાસનં તથા ॥ ૧૬૬ ॥

કૃત્વા પુનઃ પ્રકર્તવ્યં બદ્ધયોગેશ્વરાસનમ્ ।
યોગેશ્વરાસનં કૃત્વા મહાયોગેશ્વરાસનમ્ ॥ ૧૬૭ ॥

વીરાસનં તતઃ કુર્યાત્ મહાવીરાસનં તથા ।
બદ્ધવીરાસનં કૃત્વા નરો યોગેશ્વરો ભવેત્ ॥ ૧૬૮ ॥

તતઃ કુર્યાન્મહાકાલ બદ્ધકુક્કુટાસનમ્ ।
મહાકુક્કુટમાકૃત્ય કેવલં કુક્કુટાસનમ્ ॥ ૧૬૯ ॥

મયૂરાસનમેવં હિ મહામયૂરમેવ ચ ।
બદ્ધમયૂરમાકૃત્ય નરો યોગેશ્વરો ભવેત્ ॥ ૧૭૦ ॥

એતત્ સર્વં પ્રવક્તવ્યં વિચાર્ય સુમનઃપ્રિય ।
અભિષેકપ્રકરણે આસનાદિપ્રકાશકમ્ ॥ ૧૭૧ ॥

કથિતવ્યં વિશેષેણ ઇદાનીં શ◌ૃણુ ષટ્ક્રમમ્ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ઈશ્વરશ્ચ સદાશિવઃ ॥ ૧૭૨ ॥

તતઃ પરશિવો દેવઃ ષટ્શિવાઃ ષટ્પ્રકાશકાઃ ।
એતેષાં ષડ્ગુણાનન્દાઃ શક્તયઃ પરદેવતાઃ ॥ ૧૭૩ ॥

ષટ્ચક્રભેદનરતા મહાવિદ્યાધિદેવતાઃ ।
એતેષાં સ્તવનં કુર્યાત્ પરદેવસમન્વિતમ્ ॥ ૧૭૪॥

એતત્પ્રકારકરણે યશ્ચ પ્રત્યહમાદરાત્ ।
ક્રિયાનિવિષ્ટઃ સર્વત્ર ભાવનાગ્રહરૂપધૃક્ ॥ ૧૭૫॥

સ પશ્યતિ જગન્નાથં કમલોપગતં હરિમ્ ।
આદૌ હરેર્દર્શનઞ્ચ કારયેદ્યેન કુણ્ડલી ॥ ૧૭૬॥

તતો રુદ્રસ્ય સઞ્જ્ઞાયાં લાકિન્યાઃ શુભદર્શનમ્ ।
સર્વશઃ ક્રમશો નાથ દર્શનં પ્રાપ્યતે નરઃ ॥ ૧૭૭॥

શનૈઃ શનૈર્મહાકાલ કૈલાસદર્શનં ભવેત્ ।
ક્રમેણ સર્વસિદ્ધિઃ સ્યાત્ અષ્ટાઙ્ગયોગસાધનાત્ ॥ ૧૭૮॥

અષ્ટાઙ્ગસાધને કાલે યદ્યત્ કર્મ કરોતિ હિ ।
તત્સર્વં પરિયત્નેન શ‍ૃણુ સાદરપૂર્વકમ્ ।
તત્ક્રિયાદિકમાકૃત્ય શીઘ્રં યોગી ભવિષ્યતિ ॥ ૧૭૯॥

॥ ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે ભૈરવીભૈરવસંવાદે
શ્રીરાકિણીકેશવસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Mark S.G. Dyczkowski muktAbodha
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrIrAkiNIkeshavasahasranAmastotram*
pdf was typeset on August 22, 2020

Please send corrections to *sanskrit@cheerful.com*